दुर्गासप्तशती

(१२५)

फो- १

पिवा ॥२७॥ स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् ॥ मम प्रभावात्सिंहाद्या द
स्यवो वैरिनस्तथा ॥२८॥ दूरादेव पलायन्ते स्मरश्चरितं मम ॥ इत्युक्ता सा भ
गवती चंडिका चंडविक्रमा ॥२९॥ ऋषिरुवाच ॥ पश्यतामेव देवानां तत्रै
वांतरधीयते ॥ तेपि देवा निरातंका स्वाधिकारान्यथा पुरा ॥३१॥ यज्ञभाग
भुजः सर्वे चक्रुर्विनिहतारय ॥ दैत्याश्च देव्या निहते शुंभे देवरिपौ युधि ॥३२॥
जगद्विध्वंसिनि तस्मिन्महोग्रे तुलविक्रमे ॥ निशुंभे च महावीर्ये शेषाः पा

नालमायञ्जु ॥३२॥ एवं भगवती देवी सा नित्यापि पुनः पुनः ॥ संभूय कुरु
ते भूप जगतः परिपालनम् ॥३३॥ तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते
सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥३४॥ व्याप्तं तयैतत्सकलं ब्रह्मा
ण्डं मनुजेश्वर ॥ महाकाल्या महाकाले महामारीस्वरूपया ॥३५॥ सैव का
ले महामारी सैव सृष्टिर्भवत्यजा ॥ स्थितिं करोति भूतानां सैव काले सनात
नी ॥३६॥ भवत्काले नृणां सैव लक्ष्मी वृद्धिप्रदा गृहे ॥ सैव भावेन पाल